॥ लघु रुद्राभिषेक ॥

ॐ सर्व देवेभ्यो नमः

ॐ नमो भवाय शर्वाय रुद्राय वरदाय च ।
पशुनां पतये नित्यं उग्राय च कपर्दिने ॥ 1 ॥

महादेवाय भीमाय त्र्यंबकाय शिवाय च ।
ईशानाय मखन्घाय नमस्ते मखघाति ने ॥ 2 ॥

कुमार गुरवे नित्यं नील ग्रीवाय वेधसे ।
पिनाकिने हविष्याय सत्याय विभवे सदा ।
विलोहिताय धूम्राय व्याधिने नपराजिते ॥ 3 ॥

नित्यं नील शीखण्डाय शूलिने दिव्य चक्षुषे ।
हन्त्रे गोप्त्रे त्रिनेत्राय व्याधाय च सुरेतसे ॥ 4 ॥

अचिन्त्याय अंबिकाभर्त्रे सर्व देवस्तुताय च ।
वृषभध्वजाय मृडाय जटिने ब्रह्मचारिणे ॥ 5 ॥

तप्यमानाय सलिले ब्रह्मण्यायाजिताय च ।
विश्वात्मने विश्वसृजे विश्वं आवृत्य तिष्ठते ॥ 6 ॥

नमो नमस्ते सत्याय भूतानां प्रभावे नमः ।
पंच वक्त्राय शर्वाय शन्कराय शिवाय च ॥ 7 ॥

नमोस्तु वाचस्पतये प्रजानां पतये नमः ।
नमो विश्वस्य पतये महतां पतये नमः ॥ 8 ॥

नमः सहस्र शीर्षाय सहस्र भुज मन्यथे ।
सहस्र नेत्र पादाय नमो संख्येय कर्मणे ॥ 9 ॥

नमो हिरण्य वर्णाय हिरण्य कवचाय च ।
भक्तानुकंपिने नित्यं सिध्यतां नो वरः प्रभो ॥ 10 ॥

एवं स्तुत्वा महादेवं वासुदेवः सहार्जुनः ।
प्रसादयामासः भवं तदा शस्त्रोप लब्धये ॥ 11 ॥

॥ इति लघु रुद्राभिषेकं संपूर्णम् ॥